मन्दिराग्निदलारूढं सुवर्णरसकान्वितम्
नादबिन्द्विन्दुसंयुक्तं मातृनाथाङ्गदीपितम् १३
वीरभद्रो वृषारूढो मात्रग्रे स चतुर्मुखः
गौरी तु द्विभुजा त्र्यक्षा शूलिनी दर्पणान्विता १४
शूलं गलन्तिका कुण्डी वरदा च चतुर्भुजा
अब्जस्था ललिता स्कन्दगणादर्शशलाकया १५
चण्डिका दशहस्ता स्यात्खड्गशूलारिशक्तिधृक्
दक्षे वामे नागपाशं चर्माङ्कुशकुठारकम् १६
धनुः सिंहे च महिषः शूलेन प्रहतोग्रतः १७
इत्यादिमहापुराणे आग्नेये देवीप्रतिमालक्षणं नाम द्विपञ्चाशत्तमोऽध्यायः

त्रिपञ्चाशत्तमोऽध्यायः

लिङ्गलक्षणम्

श्रीभगवानुवाच
लिङ्गादिलक्षणं वक्ष्ये कमलोद्भव तच्छृणु
दैर्घ्यार्द्धं वसुभिर्भक्त्वा त्यक्त्वा भागत्रयं ततः १
विष्कम्भं भूतभागैस्तु चतुरस्रन्तु कारयेत्
आयामं मूर्तिभिर्भक्त्वा एकद्वित्रिक्रमान्न्यसेत २

ब्रह्मविष्णुशिवांशेषु वर्द्धमानोऽयमुच्यते
चतुरस्त्रेऽस्य कर्णार्द्धं गुह्यकोणेषु लाञ्छयेत ३
अष्टाग्रं वैष्णवं भागं सिध्यत्येव न संशयः
षोडशास्त्रं ततः कुर्य्याद् द्वात्रिंशास्त्रं ततः पुनः ४
चतुःषष्टयस्त्रकं कृत्वा वर्त्तुलं साधयेत्ततः
कर्तयेदथ लिङ्गस्य शिरो वै देशिकोत्तमः ५
विस्तारमथ लिङ्गस्य अष्टधा संविभाजयेत्
भागार्द्धार्द्धन्तु सन्त्यज्य च्छत्राकारं शिरो भवेत् ६
त्रिषु भागेषु सदृशमायामं यस्य विस्तरम्
तद्विभागसमं लिङ्गं सर्वकामफलप्रदम् ७
दैर्घ्यस्य तु चतुर्थेन विष्कम्भं देवपूजिते
सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतम् ८
मध्यसूत्रं समासाद्य ब्रह्मरुद्रान्तिकं बुधः
षोडशाङ्गुललिङ्गस्य षड्भागैर्भाजितो यथा ९
तद्वैयमनसूत्राभ्यां मानमन्तरमुच्यते
यवाष्टमुत्तरे कार्यं शेषाणां यवहानितः १०
अधोभागं त्रिधा कृत्वा त्वर्द्धमेकं परित्यजेत्
अष्टधा तद्द्वयं कृत्वा ऊर्ध्वभागत्रयं त्यजेत् ११

ऊर्ध्वञ्च पञ्चमाद्भागाद् भ्राम्य रेखां प्रलम्बयेत्
भागमेकं परित्यज्य सङ्गमं कारयेत्तयोः १२
एतत्साधारणं प्रोक्तं लिङ्गानां लक्षणं मया
सर्वसाधारणं वक्ष्ये पिण्डिकान्तान्निबोध मे १३
ब्रह्मभागप्रवेशञ्च ज्ञात्वा लिङ्गस्य चोच्छ्रयम्
न्यसेद् ब्रह्मशिलां विद्वान् सम्यक्कर्मशिलोपरि १४
तथा समुच्छ्रयं ज्ञात्वा पिण्डिकां प्रविभाजयेत्
द्विभागमुच्छ्रितं पीठं विस्तारे लिङ्गसम्मितम् १५
त्रिभागं मध्यतः खातं कृत्वा पीठं विभाजयेत्
स्वमानार्द्धत्रिभागेण बाहुल्यं परिकल्पयेत् १६
बाहुल्यस्य त्रिभागेण मेखलामथ कल्पयेत्
खातं स्यान्मेखलातुल्यं क्रमान्निम्नन्तु कारयेत् १७
मेखलाषोडशांशेन खातं वा तत्प्रमाणतः
उच्छ्रायं तस्य पीठस्य विकाराङ्गं तु कारयेत् १८
भूमौ प्रविष्टमेकं तु भागेनैकेन पिण्डिका
कण्ठं भागैस्त्रिभिः कार्यं भागेनैकेन पट्टिका १९
द्व्यंशेन चोर्ध्वपट्टन्तु एकांशाः शेषपट्टिकाः
भागं भागं प्रविष्टन्तु यावत्कण्ठं ततः पुनः २०

निर्गमं भागमेकं तु यावद्वै शेषपट्टिका
प्रणालस्य त्रिभागेन निर्गमस्तु त्रिभागतः २१
मूलेऽङ्गुल्यग्रविस्तारमग्रे त्र्यंशेन चार्द्धतः
ईषन्निम्नन्तु कुर्वीत खातं तच्चोत्तरेण वै २२
पिण्डिकासहितं लिङ्गमेतत्साधारणं स्मृतम् २३
इत्यादिमहापुराणे आग्नेये लिङ्गलक्षणं नाम त्रिपञ्चाशत्तमोऽध्यायः

अथ चतुःपञ्चाशत्तमोध्यायः

लिङ्गमानादिकथनम्

भगवानुवाच
वक्ष्याम्यन्यप्रकारेण लिङ्गमानादिकं शृणु
वक्ष्ये लवणजं लिङ्गं घृतजं बुद्धिवर्धनम् १
भूतये वस्त्रलिङ्गन्तु लिङ्गन्तात्कालिकं विदुः
पक्वापक्वं मृण्मयं स्यादपक्वात् पक्वजं वरम् २
ततो दारुमयं पुण्यं दारुजात् शैलजं वरम्
शैलाद्वरं तु मुक्ताजं ततो लौहं सुवर्णजम् ३
राजतं कीर्तितं ताम्रं पैत्तलं भुक्तिमुक्तिदम्
रङ्गजं रसलिङ्गञ्च भुक्तिमुक्तिप्रदं वरम् ४

रसजं रसलोहादिरत्नगर्भन्तु वर्धयेत्
मानादि नेष्टं सिद्धादि स्थापितेथ स्वयम्भुवि ५
वामे च स्वेच्छया तेषां पीठप्रासादकल्पना
पूजयेत् सूर्यविम्बस्थं दर्पणे प्रतिविम्बितम् ६
पूज्यो हरस्तु सर्वत्र लिङ्गे पूर्णार्चनं भवेत्
हस्तोत्तरविधं शैलं दारुजं तद्वदेव हि ७
चलमङ्गुलमानेन द्वारगर्भकरैः स्थितम्
अङ्गुलाद् गृहलिङ्गं स्याद्यावत् पञ्चदशाङ्गुलम् ८
द्वारमानात् त्रिसङ्ख्याकं नवधा गर्भमानतः
नवधा गर्भमानेन लिङ्गन्धाम्नि च पूजयेत् ९
एवं लिङ्गानि षट्त्रिंशत् ज्ञेयानि ज्येष्ठमानतः
मध्यमानेन षट्त्रिंशत् षट्त्रिंशदधमेन च १०
इत्थमैक्येन लिङ्गानां शतमष्टोत्तरं भवेत्
एकाङ्गुलादिपञ्चान्तं कन्यसञ्चलमुच्यते ११
षदादिदशपर्यन्तञ्चलं लिङ्गञ्च मध्यमम्
एकादशाङ्गुलादि स्यात् ज्येष्ठं पञ्चदशान्तकम् १२
षडङ्गुलं महारत्नै रत्नैरन्यैर्नवाङ्गुलम्
रविभिर्हेमभारोत्थं लिङ्गं शेषैस्त्रिपञ्चभिः १३

षोडशांशे च वेदांशे युगं लुप्त्वोर्ध्वदेशतः
द्वात्रिंशत्षोडशांशांश्च कोणयोस्तु विलोपयेत् १४
चतुर्निवेशनात् कराठो विंशतिस्त्रियुगैस्तथा
पार्श्वाभ्यां तु विलुप्ताभ्यां चललिङ्गं भवेद्वरम् १५
धाम्नो युगर्तुनागांशैर्द्वारं हीनादितः क्रमात्
लिङ्गद्वारोच्छ्र्यादर्वाग् भवेत् पादोनतः क्रमात् १६
गर्भार्धेनाधमं लिङ्गं भूतांशैः स्यात् त्रिभिर्वरम्
तयोर्मध्ये च सूत्राणि सप्त सम्पातयेत् समम् १७
एवं स्युर्नव सूत्राणि भूतसूत्रैश्च मध्यमम्
द्व्यन्तरो वामवामश्च लिङ्गानां दीर्घता नव १८
हस्ताद्विवर्धते हस्तो यावत्स्युर्नव पाणयः
हीनमध्योत्तमं लिङ्गं त्रिविधं त्रिविधात्मकम् १९
एकैकलिङ्गमध्येषु त्रीणि त्रीणि च पादशः
लिङ्गानि घटयेद्धीमान् षट्सु चाष्टोत्तरेषु च २०
स्थिरदीर्घप्रमेयात्तु द्वारगर्भकरात्मिका
भागेशश्चाप्यमीशश्च देवेज्यन्तुल्यसंज्ञितम् २१
चत्वारि लिङ्गरूपाणि विष्कम्भेण तु लक्षयेत्
दीर्घमायान्वितं कृत्वा लिङ्गं कुर्यात् त्रिरूपकम् २२

चतुरष्टाष्टवृत्तञ्च तत्त्वत्रयगुणात्मकम्
लिङ्गानामीप्सितं दैर्घ्यं तेन कृत्वाङ्गुलानि वै २३
ध्वजाद्यायैः सुरैर्भूतैः शिखिभिर्वा हरेत् कृतिम्
तान्यङ्गुलानि यच्छेषं लक्षयेच्च शुभाशुभम् २४
ध्वजाद्या ध्वजसिंहेभवृषाः ज्येष्ठाः परे शुभाः
स्वरेषु षड्जगान्धारपञ्चमाः शुभदायकाः २५
भूतेषु च शुभा भूः स्यादग्निष्वाहवनीयकः
उक्तायामस्य चार्धांशे नागांशैर्भाजिते क्रमात् २६
रसभूतांशषष्ठांशत्र्यंशाधिकशरैर्भवेत्
आढ्यानाढ्यसुरेज्यार्कतुल्यानाञ्चतुरस्रता २७
पञ्चमं वर्धमानाख्यं व्यासान्नाहप्रवृद्धितः
द्विधा भेदा बहून्यत्र वक्ष्यन्ते विश्वकर्मतः २८
आढ्यादीनां त्रिधा स्थौल्याद्यवधूतं तदष्टधा
त्रिधा हस्ताज्जिनाख्यञ्च युक्तं सर्वसमेन च २९
पञ्चविंशतिलिङ्गानि नाद्ये देवार्चिते तथा
पञ्चसप्तभिरेकत्वाज्जिनैर्भक्तैर्भवन्ति हि ३०
चतुर्दशसहस्त्राणि चतुर्दशशतानि च
एवमष्टाङ्गुलविस्तारो नवैककरगर्भतः ३१

तेषां कोणार्धकोणस्थैश्चिन्त्यात् कोणानि सूत्रकैः
विस्तारं मध्यतः कृत्वा स्थाप्यं वा मध्यतस्त्रयम् ३२
विभागादूर्ध्वमष्टास्रो द्व्यष्टास्रः स्याच्छिवांशकः
पादाज्ञान्वन्तको ब्रह्मा नाभ्यन्तो विष्णुरित्यतः ३३
मूर्ध्वान्तो भूतभागेशो व्यक्तेऽव्यक्ते च तद्गति
पञ्चलिङ्गव्यवस्थायां शिरो वर्तुलमुच्यते ३४
छत्राभं कुक्कुटाभं वा बालेन्दुप्रतिमाकृतिः
एकैकस्य चतुर्भेदैः काम्यभेदात् फलं वदे ३५
लिङ्गमस्तकविस्तारं वसुभक्तन्तु कारयेत्
आद्यभागं चतुर्धा तु विस्तारोच्छ्रायतो भजेत् ३६
चत्वारि तत्र सूत्राणि भागभागानुपातनात्
पुण्डरीकन्तु भागेन विशालाख्यं विलोपनात् ३७
त्रिशातनात्तु श्रीवत्सं शत्रुकृद्वेदलोपनात्
शिरः सर्वसमे श्रेष्ठं कुक्कुटाभं सुराह्वये ३८
चतुर्भागात्मके लिङ्गेत्रपुषं द्वयलोपनात्
अनाद्यस्य शिरः प्रोक्तमर्धचन्द्रं शिरः शृणु ३९
अंशात् प्रान्ते युगांशैश्च त्वेकाहान्यामृताह्वकं
पूर्णबालेन्दुकुमुदं द्वित्रिवेदक्षयात् क्रमात् ४०

चतुस्त्रिरेकवदनं मुखलिङ्गमतः शृणु
पूजाभागं प्रकर्तव्यं मूर्त्यग्निपदकल्पितम् ४१
अर्कांशं पूर्ववत् त्यक्त्वा षट् स्थानानि विवर्तयत्
शिरोन्नतिः प्रकर्तव्या ललाटं नासिका ततः ४२
वदनं चिवुकं ग्रीवा युगभागैर्भुजाक्षिभिः
कराभ्यां मुकुलीकृत्य प्रतिमायाः प्रमाणतः ४३
मुखं प्रति समः कार्यो विस्तारादष्टमांशतः
चतुर्मुखं मया प्रोक्तं त्रिमुखञ्चोच्यते शृणु ४४
कर्णपादाधिकास्तस्य ललाटादीनि निर्दिशेत्
भुजौ चतुर्भिर्भागैस्तु कर्तव्यौ पश्चिमोर्जितम् ४५
विस्तरादष्टमांशेन मुखानां प्रतिनिर्गमः
एकवक्त्रं तथा कार्यं पूर्वस्यां सौम्यलोचनम् ४६
ललाटनासिकावक्त्रग्रीवायाञ्च विवर्तयेत्
भुजाञ्च पञ्चमांशेन भुजहीनं विवर्तयेत् ४७
विस्तारस्य षडंशेन मुखैर्निर्गमनं हितम्
सर्वेषां मुखलिङ्गानां त्रपुषं वाथ कुक्कुटम् ४८
इत्यादिमहापुराणे आग्नेये व्यक्ताव्यक्तलक्षणं नाम
चतुःपञ्चाशत्तमोऽध्यायः

अथ पञ्चपञ्चाशत्तमोऽध्यायः
पिण्डकालक्षणकथनम्
भगवानुवाच
अतः परं प्रवक्ष्यामि प्रतिमानान्तु पिण्डिकाम्
दैर्घ्येण प्रतिमातुल्या तदर्धेन तु विस्तृता १
उच्छ्रितायामतोऽर्धेन सुविस्तारार्धभागतः
तृतीयेन तु वा तुल्यं तत्त्रिभागेण मेखला २
खातं च तत्प्रमाणं तु किञ्चिदुत्तरतो नतम्
विस्तारस्य चतुर्थेन प्रणालस्य विनिर्गमः ३
सममूलस्य विस्तारमग्रे कुर्यात्तदर्धतः
विस्तारस्य तृतीयेन तोयमार्गन्तु कारयेत् ४
पिण्डिकार्धेन वा तुल्यं दैर्घ्यमीशस्य कीर्तितम्
ईशं वा तुल्यदीर्घञ्च ज्ञात्वा सूत्रं प्रकल्पयेत् ५
उच्छ्रायं पूर्ववत् कुर्याद्भागषोडशसङ्ख्यया
अधः षट्कं द्विभागन्तु कण्ठं कुर्यात्त्रिभागकम् ६
शेषास्त्वेकैकशः कार्याः प्रतिष्ठानिर्गमास्तथा
पट्टिका पिण्डिका चेयं सामान्यप्रतिमासु च ७

प्रासादद्वारमानेन प्रतिमाद्वारमुच्यते
गजव्यालकसंयुक्ता प्रभा स्यात् प्रतिमासु च ८
पिरिडकापि यथाशोभं कर्तव्या सततं हरेः
सर्वेषामेव देवानां विष्णूक्तं मानमुच्यते
देवीनामपि सर्वासां लक्ष्म्युक्तं मानमुच्यते ९
इत्यादिमहापुराणे आग्नेये पिरिडकालक्षणं नाम
पञ्चपञ्चाशत्तमोऽध्यायः

अथ षट्पञ्चाशत्तमोऽध्यायः

दिक्पालयागकथनम्

भगवानुवाच

प्रतिष्ठापञ्चकं वक्ष्ये प्रतिमात्मा तु पूरुषः
प्रकृतिः पिरिडका लक्ष्मीः प्रतिष्ठा योगकस्तयोः १
इच्छाफलार्थिभिस्तस्मात्प्रतिष्ठा क्रियते नरैः
गर्भसूत्रं तु निःसार्य प्रासादस्याग्रतो गुरुः २
अष्टषोडशविंशान्तं मराडपञ्चाधमादिकम्
स्नानार्थं कलशार्थञ्च यागद्रव्यार्थमर्धतः ३
त्रिभागेणार्धभागेन वेदिं कुर्यात्तु शोभनाम्
कलशैर्घटिकाभिश्च वितानाद्यैश्च भूषयेत् ४

पञ्चगव्येन सम्प्रोक्ष्य सर्वद्रव्याणि धारयेत्
अलङ्कृतो गुरुर्विष्णुं ध्यात्वात्मानं प्रपूजयेत् ५
अङ्गुलीयप्रभृतिभिर्मूर्तिपान् वलयादिभिः
कुण्डे कुण्डे स्थापयेच्च मूर्तिपांस्तत्र पारगान् ६
चतुष्कोणे चार्धकोणे वर्तुले पद्मसन्निभे
पूर्वादौ तोरणार्थन्तु पिप्पलोडुम्बरौ वटम् ७
प्लक्षं सुशोभनं पूर्वं सुभद्रन्दक्षतोरणम्
सुकर्म च सुहोत्रञ्च आप्ये सौम्ये समुच्छ्रयम् ८
पञ्चहस्तं तु संस्थाप्य स्योनापृथ्वीति पूजयेत्
तोरणस्तम्भमूले तु कलशान्मङ्गलाङ्कुरान् ९
प्रदद्यादुपरिष्टाच्च कुर्याच्चक्रं सुदर्शनम्
पञ्चहस्तप्रमाणन्तु ध्वजं कुर्याद्द्विचक्षणः १०
वैपुल्यं चास्य कुर्वीत षोडशाङ्गुलसम्मितम्
सप्तहस्तोच्छ्रितं वास्य कुर्यात् कुण्डं सुरोत्तम ११
अरुणोऽग्निनिभश्चैव कृष्णः शुक्लोऽथ पीतकः
रक्तवर्णस्तथा श्वेतः श्वेतवर्णादिकक्रमात् १२
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः १३

पूज्या कोटिगुरौर्युक्ताः पूर्वाद्या ध्वजदेवताः
जलाढकसुपूरास्तु पक्वविम्बोपमा घटाः १४
अष्टाविंशाधिकशतं कालमराडनवर्जिताः
सहिरराया वस्त्रकराठाः सोदकास्तोररााद्वहिः १५
घटाः स्थाप्याश्च पूर्वादौ वेदिकायाश्च कोरागान्
चतुरः स्थापयेत् कुम्भानाजिघ्रेति च मन्त्रतः १६
कुम्भेष्वावाह्य शक्रादीन् पूर्वादौ पूजयेत् क्रमात्
इन्द्रागच्छ देवराज वज्रहस्त गजस्थित १७
पूर्वद्वारञ्च मे रक्ष देवैः सह नमोस्तु ते
त्रातारमिन्द्रमन्त्रेरा अर्चयित्वा यजेद् बुधः १८
आगच्छाग्ने शक्तियुत च्छागस्थ बलसंयुत
रक्षाग्नेयीं दिशं देवैः पूजां गृह नमोऽस्तु ते १९
अग्निमूर्ध्वेतिमन्त्रेरा यजेद्वा अग्नये नमः
महिषस्थ समागच्छ दराडहस्त महाबल २०
रक्ष त्वं दक्षिराद्वारं वैवस्वत नमोऽस्तु ते
वैवस्वतं सङ्गमनमित्यनेन यजेद्यमम् २१
नैर्ऋृतागच्छ खड्गाढ्य बलवाहनसंयुत

इदमर्घ्यमिदं पाद्यं रक्ष त्वं नैर्ऋतीं दिशम् २२
एष ते नैर्ऋते मन्त्रेण यजेदर्घ्यादिभिर्नरः
मकरारूढ वरुण पाशहस्त महाबल २३
आगच्छ पश्चिमं द्वारं रक्ष रक्ष नमोऽस्तु ते
उरुं हि राजा वरुणं यजेदर्घ्यादिभिर्गुरुः २४
आगच्छ वायो सबल ध्वजहस्त सवाहन
वायव्यं रक्ष देवैस्त्वं समरुद्भिर्नमोऽस्तु ते २५
वात इत्यादिभिश्चार्वेदोन्नमो वायवेऽपि वा
आगच्छ सोम सबल गदाहस्त सवाहन २६
रक्ष त्वमुत्तरद्वारं सकुवेर नमोऽस्तु ते
सोमं राजानमिति वा यजेत्सोमाय वै नमः २७
आगच्छेशान सबल शूलहस्त वृषस्थित
यज्ञमण्डपस्यैशानीं दिशं रक्ष नमोऽस्तु ते २८
ईशानमस्येति यजेदीशानाय नमोऽपि वा
ब्रह्मन्नागच्छ हंसस्थ स्रुक्स्रुवव्यग्रहस्तक २९
सलोकोर्ध्वां दिशं रक्ष यज्ञस्याज नमोऽस्तु ते
हिरण्यगर्भेति यजेन्नमस्ते ब्रह्मणेऽपि वा ३०

अनन्तागच्छ चक्राढ्य कूर्मस्थाहिगणेश्वर
अधोदिशं रक्ष रक्ष अनन्तेश नमोऽस्तु ते
नमोऽस्तु सर्पेति यजेदनन्ताय नमोऽपि वा ३१
इत्यादिमहापुराणे आग्नेये दिक्पतियागो नाम षट्पञ्चाशत्तमोध्यायः

अथ सप्तपञ्चाशत्तमोऽध्यायः

कुम्भाधिवासविधिः

भगवानुवाच

भूमेः परिग्रहं कुर्यात् क्षिपेद् ब्रीहींश्च सर्षपान्
नारसिंहेन रक्षोघ्नान् प्रोक्षयेत् पञ्चगव्यतः १
भूमिं घटे तु सम्पूज्य सरत्ने साङ्गकं हरिम्
अस्त्रमन्त्रेण करकं तत्र चाष्टशतं यजेत् २
अच्छिन्नधारया सिञ्चन् ब्रीहीन् संस्कृत्य धारयेत्
प्रदक्षिणं परिभ्राम्य कलशं विकिरोपरि ३
सवस्त्रे कलशे भूयः पूजयेदच्युतं श्रियम्
योगे योगेति मन्त्रेण न्यसेच्छय्यान्तु मण्डले ४
कुशोपरि तूलिकाञ्च शय्यायां दिग्विदिक्षु च
विद्याधिपान् यजेद्विष्णुं मधुघातं त्रिविक्रमम् ५

वामनं दिक्षु वाय्वादौ श्रीधरञ्च हृषीकपम्
पद्मनाभं दामोदरमैशान्यां स्नानमण्डपे ६
अभ्यर्च्य पश्चादैशान्यां चतुष्कुम्भे सवेदिके
स्नानमण्डपके सर्वद्रव्याण्यानीय निक्षिपेत् ७
स्नानकुम्भेषु कुम्भांस्तांश्चतुर्दिक्ष्वधिवासयेत्
कलशाः स्थापनीयास्तु अभिषेकार्थमादरात् ८
वटोदुम्बरकाश्वत्थांश्चम्पकाशोकश्रीद्रुमान्
पलाशार्जुनप्लक्षांस्तु कदम्बवकुलाम्रकान् ९
पल्लवांस्तु समानीय पूर्वकुम्भे विनिक्षिपेत्
पद्मकं रोचनां दूर्वां दर्भपिञ्जलमेव च १०
जातीपुष्पं कुन्दपुष्पचन्दनं रक्तचन्दनम्
सिद्धार्थं तगरञ्चैव तण्डुलं दक्षिणे न्यसेत् ११
सुवर्णं रजतञ्चैव कूलद्वयमृदन्तथा
नद्याः समुद्रगामिन्या विशेषात् जाह्नवीमृदम् १२
गोमयञ्च यवान् शालींस्तिलांश्चैवापरे न्यसेत्
विष्णुपर्णीं श्यामलतां भृङ्गराजं शतावरीम् १३
सहदेवां महादेवीं बलां व्याघ्रीं सलक्ष्मणाम्

ऐशान्यामपरे कुम्भे मङ्गल्यान्विनिवेशयेत् १४
वल्मीकमृत्तिकां सप्तस्थानोत्थामपरे न्यसेत्
जाह्नवीवालुकातोयं विन्यसेदपरे घटे १५
वराहवृषनागेन्द्रविषाणोद्धृतमृत्तिकाम्
मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे न्यसेत् १६
तीर्थपर्वतमृद्भिश्च युक्तमप्यपरे न्यसेत्
नागकेशरपुष्पञ्च काश्मीरमपरे न्यसेत् १७
चन्दनागुरुकर्पूरैः पुष्पं चैवापरे न्यसेत्
वैदूर्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव च १८
एतान्येकत्र निक्षिप्य स्थापयेद्देवसत्तम
नदीनदतडागानां सलिलैरपरं न्यसेत् १९
एकाशीतिपदे चान्यान्मण्डपे कलशान् न्यसेत्
गन्धोदकाद्यैः सम्पूर्णान् श्रीसूक्तेनाभिमन्त्रयेत् २०
यवं सिद्धार्थकं गन्धं कुशाग्रं चाक्षतं तथा
तिलान् फलं तथा पुष्पमर्घ्यार्थं पूर्वतो न्यसेत् २१
पद्मं श्यामलतां दूर्वां विष्णुपर्णीं कुशांस्तथा
पाद्यार्थं दक्षिणे भागे मधुपर्कं तु दक्षिणे २२

कक्कोलकं लवङ्गञ्च तथा जातीफलं शुभम्
उत्तरे ह्याचमनाय अग्नौ दूर्वाक्षतान्वितम् २३
पात्रं नीराजनार्थं च तथोद्वर्तनमानिले
गन्धपुष्पान्वितं पात्रमैशान्यां पात्रके न्यसेत् २४
सुरामांसीं चामलकं सहदेवां निशादिकम्
षष्टिदीपान्नचसेदष्टौ न्यसेन्नीराजनाय च २५
शङ्खं चक्रञ्च श्रीवत्सं कुलिशं पङ्कजादिकम्
हेमादिपात्रे कृत्वा तु नानावर्णादिपुष्पकम् २६
इत्यादिमहापुराणे आग्नेये कलशाधिवासो नाम सप्तपञ्चाशत्तमोऽध्यायः

अथ अष्टपञ्चाशत्तमोऽध्यायः

स्नानादिविधिः

भगवानुवाच

ऐशान्यां जनयेत् कुण्डं गुरुर्वह्निञ्च वैष्णवम्
गायत्र्यष्टशतं हुत्वा सम्पातविधिना घटान् १
प्रोक्षयेत् कारुशालायां शिल्पिभिर्मूर्तिपैर्व्रजेत्
तूर्यशब्दैः कौतुकञ्च बन्धयेद्दक्षिणे करे २

विष्णवे शिपिविष्टेति ऊर्णासूत्रेण सर्षपैः
पट्टवस्त्रेण कर्तव्यं देशिकस्यापि कौतुकम् ३
मण्डपे प्रतिमां स्थाप्य सवस्त्रां पूजितां स्तुवन्
नमस्तेऽर्च्ये सुरेशानि प्रणीते विश्वकर्मणा ४
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः
त्वयि सम्पूजयामीशे नारायणमनामयम् ५
रहिता शिल्पिदोषैस्त्वमृद्धियुक्ता सदा भव
एवं विज्ञाप्य प्रतिमां नयेत्तां स्नानमण्डपम् ६
शिल्पिनन्तोषयेद्द्रव्यैर्गुरवे गां प्रदापयेत्
चित्रं देवेति मन्त्रेण नेत्रे चोन्मीलयेत्ततः ७
अग्निर्ज्योतीति दृष्टिञ्च दद्याद्वै भद्रपीठके
ततः शुक्लानि पुष्पाणि घृतं सिद्धार्थकं तथा ८
दूर्वां कुशाग्रं देवस्य दद्याच्छिरसि देशिकः
मधुवातेति मन्त्रेण नेत्रे चाभ्यञ्जयेद्गुरुः ९
हिरण्यगर्भमन्त्रेण इमं मेति च कीर्तयेत्
घृतेनाभ्यञ्जयेत् पश्चात् पठन् घृतवतीं पुनः १०
मसूरपिष्टेनोद्वर्त्य अतो देवेति कीर्तयन्

क्षालयेदुष्णतोयेन सप्त तेऽग्नेति देशिकः ११
द्रुपदादिवेत्यनुलिम्पेदापो हि ष्ठेति सेचयेत्
नदीजैस्तीर्थजैः स्नानं पावमानीति रत्नजैः १२
समुद्रं गच्छ चन्दनैस्तीर्थमृत्कलशेन च
शन्नो देवीः स्नापयेच्च गायत्र्याप्युष्णवारिणा १३
पञ्चमृद्भिर्हिरण्येति स्नापयेत्परमेश्वरम्
सिकताद्भिरिमं मेति वल्मीकोदघटेन च १४
तद्विष्णोरिति ओषध्यद्भिर्या ओषधीति मन्त्रतः
यज्ञायज्ञेति काषायैः पञ्चभिर्गव्यकैस्ततः १५
पयः पृथिव्यां मन्त्रेण याः फलिनी फलाम्बुभिः
विश्वतश्चक्षुः सौम्येन पूर्वेण कलसेन च १६
सोमं राजानमित्येवं विष्णो रराटं दक्षतः
हंसः शुचिः पश्चिमेन कुर्यादुद्वर्तनं हरेः १७
मूर्धानन्दिवमन्त्रेण धात्रीं मांसीं च के ददेत्
मानस्तोकेति मन्त्रेण गन्धद्वारेति गन्धकैः १८
इदमापेति च घटैरेकाशीतिपदस्थितैः
एह्येहि भगवन् विष्णो लोकानुग्रहकारक १९

यज्ञभागं गृहाणेमं वासुदेव नमोऽस्तु ते
अनेनावाह्य देवेशं कुर्यात् कौतुकमोचनम् २०
मुञ्चामि त्वेति सूक्तेन देशिकस्यापि मोचयेत्
हिरण्मयेन पाद्यं दद्यादतो देवेति चार्घ्यकम् २१
मधुवाता मधुपर्कं मयि गृह्णामि चाचमेत्
अक्षन्नमीमदन्तेति किरेद्दर्वाक्षतं बुधः २२
काण्डान्निर्मञ्छनं कुर्याद्गन्धं गन्धवतीति च
उन्नयामीति माल्यञ्च इदं विष्णुः पवित्रकम् २३
वृहस्पते वस्त्रयुग्मं वेदाहमित्युत्तरीयकम्
महाव्रतेन सकलीपुष्पं चौषधयः क्षिपेत् २४
धूपं दद्याद्धूरसीति विभ्राट्सूक्तेन चाञ्जनम्
युञ्जन्तीति च तिलकं दीर्घायुष्ट्वेति माल्यकम् २५
इन्द्रच्छत्रेति छत्रन्तु आदर्शन्तु विराजतः
चामरन्तु विकर्णेन भूषां रथन्तरेण च २६
व्यजनं वायुदैवत्यैर्मुञ्चामि त्वेति पुष्पकम्
वेदाद्यैः संस्तुतिं कुर्याद्धरेः पुरुषसूक्ततः २७
सर्वमेतत्समं कुर्यात् पिण्डिकादौ हरादिके
देवस्योत्थानसमये सौपर्णं सूक्तमुच्चरेत् २८

उत्तिष्ठेति समुत्थाप्य शय्याया मराडपे नयेत्
शाकुनेनैव सूक्तेन देवं ब्रह्मरथादिना २९
अतो देवेति सूक्तेन प्रातिमां पिरिडकां तथा
श्रीसूक्तेन च शय्यायां विष्णोस्तु शकलीकृतिः ३०
मृगराजं वृषं नागं व्यजनं कलशं तथा
वैजयन्तीं तथा भेरीं दीपमित्यष्टमङ्गलम् ३१
दर्शयेदश्वसूक्तेन पाददेशे त्रिपादिति
उखां पिधानकं पात्रमम्बिकां दर्विकां ददेत् ३२
मुषलोलूखलं दद्याच्छिलां सम्मार्जनीं तथा
तथा भोजनभाराडानि गृहोपकाराणानि च ३३
शिरोदेशे च निद्राख्यं वस्त्ररत्नयुतं घटम्
खराडखाद्यैः पूरयित्वा स्नपनस्य विधिः स्मृतः ३४

इत्यादिमहापुराणे आग्नेये स्नपनादिविधानं नाम
अष्टपञ्चाशत्तमोऽध्यायः

अथोनषष्टितमोऽध्यायः

अधिवासनकथनम्

भगवानुवाच
हरेः सान्निध्यकरणमधिवासनमुच्यते
सर्वज्ञं सर्वगं ध्यात्वा आत्मानं पुरुषोत्तमम् १
ॐकारेण समायोज्य चिच्छक्तिमभिमानिनीम्
निःसार्यात्मैकतां कृत्वा स्वस्मिन् सर्वगते विभौ २
योजयेन्मरुतां पृथ्वीं वह्निवीजेन दीपयेत्
संहरेद्वायुना चाग्निं वायुमाकाशतो नयेत् ३
अधिभूतादिदेवैस्तु साध्याख्यैर्विभवैः सह
तन्मात्रपात्रकान् कृत्वा संहरेत्तत्क्रमाद् बुधः ४
आकाशं मनसाहृत्य मनोहङ्करणे कुरु
अहङ्कारञ्च महति तञ्चाप्यव्याकृते नयेत् ५
अव्याकृतं ज्ञानरूपे वासुदेवः स ईरितः
स तामव्याकृतिं मायामवभ्यष्ट सिसृक्षया ६
सङ्कर्षणं सं शब्दात्मा स्पर्शाख्यमसृजत् प्रभुः
क्षोभ्य मायां स प्रद्युम्नं तेजोरूपं स चासृजत् ७
अनिरुद्धं रसमात्रं ब्रह्माणं गन्धरूपकम्
अनिरुद्धः स च ब्रह्मा अप आदौ ससर्ज ह ८

तस्मिन् हिरण्मयञ्चाण्डं सोऽसृजत् पञ्चभूतवत्
तस्मिन् सङ्क्रामिते जीवे शक्तिरात्मोपसंहृता ९
प्राणो जीवेन संयुक्तो वृत्तिमानिति शब्द्यते
जीवोऽव्याहृतिसञ्ज्ञस्तु प्राणेष्वाध्यात्मिकः स्मृतः १०
प्राणैर्युक्ता ततो बुद्धिः सञ्जाता चाष्टमूर्तिकी
अहङ्कारस्ततो जज्ञे मनस्तस्मादजायत ११
अर्थाः प्रजज्ञिरे पञ्च सङ्कल्पादियुतास्ततः
शब्दः स्पर्शश्च रूपञ्च रसो गन्ध इति स्मृताः १२
ज्ञानशक्तियुतान्येतैरारब्धानीन्द्रियाणि तु
त्वक्श्रोत्रघ्राणचक्षूंषि जिह्वाबुद्धीन्द्रियाणि तु १३
पादौ पायुःस्तथा पाणी वागुपस्थश्च पञ्चमः
कर्मेन्द्रियाणि चैतानि पञ्चभूतान्यतः शृणु १४
आकाशवायुतेजांसि सलिलं पृथिवी तथा
स्थूलमेभिः शरीरन्तु सर्वाधारं प्रजायते १५
एतेषां वाचका मन्त्रा न्यासायोच्यन्त उत्तमाः
जीवभूतं मकारन्तु देवस्य व्यापकं न्यसेत् १६
प्राणतत्त्वं भकारन्तु जीवोपाधिगतं न्यसेत्
हृदयस्थं बकारन्तु बुद्धितत्त्वं न्यसेद् बुधः १७

फकारमपि तत्रैव ग्रहङ्कारमयं न्यसेत्
मनस्तत्त्वं पकारन्तु न्यसेत्सङ्कल्पसम्भवम् १८
शब्दतन्मात्रतत्त्वन्तु नकारं मस्तके न्यसेत्
स्पर्शात्मकं धकारन्तु वक्त्रदेशे तु विन्यसेत् १९
दकारं रूपतत्त्वन्तु हृद्देशे विनिवेशयेत्
थकारं वस्तिदेशे तु रसतन्मात्रकं न्यसेत् २०
तकारं गन्धतन्मात्रं जङ्घयोर्विनिवेशयेत्
णकारं श्रोत्रयोर्न्यस्य ढकारं विन्यसेत्त्वचि २१
डकारं नेत्रयुग्मे तु रसनायां ठकारकम्
टकारं नासिकायान्तु ञकारं वाचि विन्यसेत् २२
झकारं करयोर्न्यस्य पाणितत्त्वं विचक्षणः
जकारं पदयोर्न्यस्य छं पायौ चमुपस्थके २३
विन्यसेत् पृथिवीतत्त्वं ङकारं पादयुग्मके
वस्तौ घकारं गं तत्त्वं तैजसं हृदि विन्यसेत् २४
खकारं वायुतत्त्वञ्च नासिकायां निवेशयेत्
ककारं विन्यसेन्नित्यं खतत्त्वं मस्तके बुधः २५
हृत्पुण्डरीके विन्यस्य यकारं सूर्यदैवतम्

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः २६
कलाषोडशसंयुक्तं मकारं तत्र विन्यसेत्
तन्मध्ये चिन्तयेन्मन्त्री विन्दुं वह्नेस्तु मराडलम् २७
हकारं विन्यसेत्तत्र प्रणवेन सुरोत्तमम्
ॐ आं परमेष्ठ्यात्मने आं नमः पुरुषात्मने २८
ॐ वां मनोनिवृत्त्यात्मने नाञ्च विश्वात्मने नमः
ॐ वं नमः सर्वात्मने इत्युक्ताः पञ्च शक्तयः २९
स्थाने तु प्रथमा योज्या द्वितीया आसने मता
तृतीया शयने तद्वच्चतुर्थी पानकर्मणि ३०
प्रत्यर्चायां पञ्चमी स्यात्पञ्चोपनिषदः स्मृताः
हूङ्कारं विन्यसेन्मध्ये ध्यात्वा मन्त्रमयं हरिम् ३१
यां मूर्तिं स्थापयेत्तस्मात् मूलमन्त्रं न्यसेत्ततः
ॐ नमो भगवते वासुदेवाय मूलकम् ३२
शिरोघ्राणललाटेषु मुखकराठहृदि क्रमात्
भुजयोर्जङ्घयोरङ्घ्र्योः केशवं शिरसि न्यसेत् ३३
नारायणं न्यसेद्वक्त्रे ग्रीवायां माधवं न्यसेत्
गोविन्दं भुजयोर्न्यस्य विष्णुं च हृदये न्यसेत् ३४
मधुसूदनकं पृष्ठे वामनं जठरे न्यसेत्
कट्यान्त्रिविक्रमं न्यस्य जङ्घायां श्रीधरं न्यसेत् ३५

हृषीकेशं दक्षिणायां पद्मनाभं तु गुल्फके
दामोदरं पादयोश्च हृदयादिषडङ्गकम् ३६
एतत्साधारणं प्रोक्तमादिमूर्तेस्तु सत्तम
अथवा यस्य देवस्य प्रारब्धं स्थापनं भवेत् ३७
तस्यैव मूलमन्त्रेण सजीवकरणं भवेत्
यस्या मूर्तेऽस्तु यन्नाम तस्याद्यं चाक्षरं च यत् ३८
तत् स्वरैर्द्वादशैर्भेद्य ह्यङ्गानि परिकल्पयेत्
हृदयादीनि देवेश मूलञ्च दशमाक्षरम् ३९
यथा देवे तथा देहे तत्त्वानि विनियोजयेत्
चक्राब्जमण्डले विष्णुं यजेद्गन्धादिना तथा ४०
पूर्ववच्चासनं ध्यायेत्सगात्रं सपरिच्छदम्
शुभञ्चक्रं द्वादशारं ह्युपरिष्टाद्विचिन्तयेत् ४१
त्रिनाभिचक्रं द्विनेमि स्वरैस्तच्च समन्वितम्
पृष्ठदेशे ततः प्राज्ञः प्रकृत्यादीन्निवेशयेत् ४२
पूजयेदारकाग्रेषु सूर्यं द्वादशधा पुनः
कलाषोडशसंयुक्तं सोमन्तत्र विचिन्तयेत् ४३
सबलं त्रितयं नाभौ चिन्तयेद्देशिकोत्तमः
पद्मञ्च द्वादशदलं पद्ममध्ये विचिन्तयेत् ४४

तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य च दिशिकः
प्रतिमायां हरिं न्यस्य तत्र तं पूजयेत् सुरान् ४५
गन्धपुष्पादिभिः सम्यक् साङ्गं सावरणं क्रमात्
द्वादशाक्षरबीजैस्तु केशवादीन् समर्चयेत् ४६
द्वादशारे मण्डले तु लोकपालादिकं क्रमात्
प्रतिमामर्चयेत् पश्चाद्गन्धपुष्पादिभिर्द्विजः ४७
पौरुषेण तु सूक्तेन श्रियाः सूक्तेन पिण्डिकाम्
जननादिक्रमात् पश्चाज्जनयेद्वैष्णवानलम् ४८
हुत्वाग्निं वैष्णवैर्मन्त्रैः कुर्य्याच्छान्त्युदकं बुधः
तत्सिक्त्वा प्रतिमामामूर्ध्नि वह्निप्रणयनं चरेत् ४९
दक्षिणेऽग्निं हुतमिति कुण्डेऽग्निं प्रणयेद्बुधः
अग्निमग्नीति पूर्वे तु कुण्डेऽग्निं प्रणयेद्बुधः ५०
उत्तरे प्रणयेदग्निमग्निमग्नी हवामहे
अग्निप्रणयने मन्त्रस्त्वमग्ने ह्यग्निरुच्यते ५१
पलाशसमिधानान्तु अष्टोत्तरसहस्रकम्
कुण्डे कुण्डे होमयेच्च व्रीहीन् वेदादिकैस्तथा ५२
साज्यांस्तिलान् व्याहृतिभिर्मूलमन्त्रेण वै धृतम्
कुर्यात्ततः शान्तिहोमं मधुरत्रितयेन च ५३

द्वादशार्णैः स्पृशेत् पादौ नाभिं हृन् मस्तकं ततः
घृतं दधि पयो हुत्वा स्पृशेन्मूर्धन्यथो ततः ५४
स्पृष्ट्वा शिरोनाभिपादांश्चतस्त्रः स्थापयेन्नदीः
गङ्गा च यमुना गोदा क्रमान्नाम्ना सरस्वती ५५
दहेत्तु विष्णुगायत्र्या गायत्र्या श्रपयेच्चरुम्
होमयेच्च बलिं दद्यादुत्तरे भोजयेद्द्विजान् ५६
सामाधिपानां तुष्ट्यर्थं हेमगां गुरवे ददेत्
दिक्पतिभ्यो बलिं दत्त्वा रात्रौ कुर्याच्च जागरम्
ब्रह्मगीतादिशब्देन सर्वभागधिवासनात् ५७
इत्यादिमहापुराणे आग्नेये अधिवासनं नाम ऊनषष्टितमोऽध्यायः

अथ षष्टितमोऽध्यायः
वासुदेवप्रतिष्ठादिविधिः
भगवानुवाच
पिण्डिकास्थापनार्थन्तु गर्भाकारं तु सप्तधा
विभजेद् ब्रह्मभागे तु प्रतिमां स्थापयेद् बुधः १
देवमनुषपैशाचभागेषु न कदाचन
ब्रह्मभागं परित्यज्य किञ्चिदाश्रित्य चाण्डजम् २

देवमानुषभागाभ्यां स्थाप्या यत्नात्तु पिण्डिका
नपुंसककशिलायान्तु रत्नन्यासं समाचरेत् ३
नारसिंहेन हुत्वाथ रत्नन्यासं च तेन वै
व्रीहीन् रत्नांस्त्रिधातूंश्च लोहादींश्चन्दनादिकान् ४
पूर्वादिनवगर्तेषु न्यसेन् मध्ये यथारुचि
अथ चेन्द्रादिमन्त्रैश्च गर्तो गुग्गुलुनावृतः ५
रत्नन्यासविधिं कृत्वा प्रतिमामालभेद्गुरुः
सशलाकैर्दर्भपुञ्जैः सहदेवैः समन्वितैः ६
सबाह्यन्तैश्च संस्कृत्य पञ्चगव्येन शोधयेत्
प्रोक्षयेद्दर्भतोयेन नदीतीर्थोदकेन च ७
होमार्थे स्थण्डिलं कुर्यात् सिकताभिः समन्ततः
सार्धहस्तप्रमाणं तु चतुरस्त्रं सुशोभनम् ८
अष्टदिक्षु यथान्यासं कलशानपि विन्यसेत्
पूर्वाद्यानष्टवर्णेन अग्निमानीय संस्कृतम् ९
त्वमग्नेद्युभिरिति गायत्र्या समिधो हुनेत्
अष्टार्णेनाष्टशतकमाज्यं पूर्णां प्रदापयेत् १०
शान्त्युदकमाम्रपत्रैः मूलेन शतमन्त्रितम्
सिञ्चेद्देवस्य तन्मूर्ध्नि श्रीश्च ते ह्यनया ऋचा ११

ब्रह्मयानेन चोद्धृत्य उत्तिष्ठ ब्रह्मणस्पते
तद्विष्णोरिति मन्त्रेण प्रासादाभिमुखं नयेत् १२
शिविकायां हरिं स्थाप्य भ्रामयीत पुरादिकम्
गीतवेदादिशब्दैश्च प्रासादद्वारि धारयेत् १३
स्त्रीभिर्विप्रैर्मङ्गलाष्टघटैः संस्नापयेद्धरिम्
ततो गन्धादिनाभ्यर्च्य मूलमन्त्रेण देशिकः १४
अतो देवेति वस्त्राद्यमष्टाङ्गार्घ्यं निवेद्य च
स्थिरे लग्ने पिण्डिकायां देवस्य त्वेति धारयेत् १५
ॐ त्रैलोक्यविक्रान्ताय नमस्तेऽस्तु त्रिविक्रम
संस्थाप्य पिण्डिकायान्तु स्थिरं कुर्याद्विचक्षणः १६
ध्रुवा द्यौरिति मन्त्रेण विश्वतश्चक्षुरित्यपि
पञ्चगव्येन संस्नाप्य क्षाल्य गन्धोदकेन च १७
पूजयेत् सकलीकृत्य साङ्गं सावरणं हरिम्
ध्यायेत् स्वं तस्य मूर्तिन्तु पृथिवी तस्य पीठिका १८
कल्पयेद्विग्रहं तस्य तैजसैः परमाणुभिः
जीवमावाहयिष्यामि पञ्चविंशतितत्त्वगम् १९
चैतन्यं परमानन्दं जाग्रत्स्वप्नविवर्जितम्
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम् २०

ब्रह्मादिस्तम्बपर्यन्तं हृदयेषु व्यवस्थितम्
हृदयात् प्रतिमाविम्बे स्थिरो भव परेश्वर २१
सजीवं कुरु बिम्बं त्वं सवाह्याभ्यन्तरस्थितः
अङ्गुष्ठमात्रः पुरुषो देहोपाधिषु संस्थितः २२
ज्योतिर्ज्ञानं परं ब्रह्म एकमेवाद्वितीयकम्
सजीवीकरणं कृत्वा प्रणवेन निबोधयेत् २३
सान्निध्यकरणान्नाम हृदयं स्पृश्य वै जपेत्
सूक्तन्तु पौरुषं ध्यायन् इदं गुह्यमनुं जपेत् २४
नमस्तेऽस्तु सुरेशाय सन्तोषविभवात्मने
ज्ञानविज्ञानरूपाय ब्रह्मतेजोनुयायिने २५
गुणातिक्रान्तवेशाय पुरुषाय महात्मने
अक्षयाय पुराणाय विष्णो सन्निहितो भव २६
यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः
तत् सर्वमेकतो लीनमस्मिन्देहे विबुध्यताम् २७
आत्मानं सन्निधीकृत्य ब्रह्मादिपरिवारकान्
स्वनाम्ना स्थापयेदन्यानायुधान् स्वमुद्रया २८
यात्रावर्षादिकं दृष्ट्वा ज्ञेयः सन्निहितो हरिः
नत्वा स्तुत्वा स्तवाद्यैश्च जप्त्वा चाष्टाक्षरादिकम् २९

चराडप्रचराडौ द्वारस्थौ निर्गत्याभ्यर्चयेद्गुरुः
अग्निमराडपमासाद्य गरुडं स्थाप्य पूजयेत् ३०
दिगीशान् दिशि देवांश्च स्थाप्य सम्पूज्य देशिकः
विश्वक्सेनं तु संस्थाप्य शङ्खचक्रादि पूजयेत् ३१
सर्वपार्षदकेभ्यश्च बलिं भूतेभ्य अर्पयेत्
ग्रामवस्त्रसुवर्णादि गुरवे दक्षिणां ददेत् ३२
यागोपयोगिद्रव्याद्यमाचार्याय नरोऽर्पयेत्
आचार्यदक्षिणार्धन्तु ऋत्विग्भ्यो दक्षिणां ददेत् ३३
अन्येभ्यो दक्षिणां दद्याद्भोजयेद् ब्राह्मणांस्ततः
अवारितान् फलान् दद्याद्यजमानाय वै गुरुः ३४
विष्णुं नयेत् प्रतिष्ठाता चात्मना सकलं कुलम्
सर्वेषामेव देवानामेष साधारणो विधिः
मूलमन्त्राः पृथक्तेषां शेषं कार्यं समानकम् ३५

इत्यादिमहापुराणे आग्नेये वासुदेवप्रतिष्ठादिकथनं नाम षष्टितमोऽध्यायः

अथ एकषष्टितमोऽध्यायः
द्वारप्रतिष्ठाध्वजारोहणादिविधिः

भगवानुवाच
वक्ष्ये चावभृथस्नानं विष्णोर्न त्वेति होमयेत्
एकाशीतिपदे कुम्भान् स्थाप्य संस्थापयेद्धरिम् १
पूजयेद् गन्धपुष्पाद्यैर्बलिं दत्वा गुरुं यजेत्
द्वारप्रतिष्ठां वक्ष्यामि द्वाराधो हेम वै ददेत् २
अष्टभिः कलशैः स्थाप्य शाखोदुम्बरकौ गुरुः
गन्धादिभिः समभ्यर्च्य मन्त्रैर्वेदादिभिर्गुरुः ३
कुण्डेषु होमयेद्वह्निं समिल्लाजतिलादिभिः
दत्त्वा शय्यादिकञ्चाधो दद्यादाधारशक्तिकाम् ४
शाखयोर्विन्यसेन्मूले देवौ चण्डप्रचण्डकौ
ऊर्ध्वोदुम्बरके देवीं लक्ष्मीं सुरगणार्चिताम् ५
न्यस्याभ्यर्च्य यथान्यायं श्रीसूक्तेन चतुर्मुखम्
दत्त्वा तु श्रीफलादीनि आचार्यादेस्तु दक्षिणाम् ६
प्रतिष्ठासिद्धद्वारस्य त्वाचार्यः स्थापयेद्धरिम्
प्रासादादस्य प्रतिष्ठन्तु हृत्प्रतिष्ठेति तां शृणु ७
समाप्तौ शुकनाशाया वेद्याः प्राग्दर्भमस्तके
सौवर्णं राजतं कुम्भमथवा शुक्लनिर्मितम् ८

अष्टरत्नौषधीधातुवीजलौहान्वितं शुभम्
सवस्त्रं पूरितं चाद्भिर्मण्डले चाधिवासयेत् ९
सपल्लवं नृसिंहेन हुत्वा सम्पातसञ्चितम्
नारायणाख्यतत्त्वेन प्राणभूतं न्यसेत्ततः १०
वैराजभूतं तं ध्यायेत् प्रासादस्य सुरेश्वर
ततः पुरुषवत्सर्वं प्रासादं चिन्तयेद् बुधः ११
अधो दत्त्वा सुवर्णं तु तद्वद् भूतं घटं न्यसेत्
गुर्वादौ दक्षिणां दद्याद् ब्राह्मणादेश्च भोजनम् १२
ततः पश्चाद्वेदिबन्धं तदूर्ध्वं कण्ठबन्धनम्
कण्ठोपरिष्टात् कर्तव्यं विमलामलसारकम् १३
तदूर्ध्वं वृकलं कुर्याच्चक्रञ्चाद्यं सुदर्शनम्
मूर्त्तिं श्रीवासुदेवस्य ग्रहगुप्तां निवेदयेत् १४
कलशं वाथ कुर्वीत तदूर्ध्वं चक्रमुत्तमम्
वेद्याश्च परितः स्थाप्या अष्टौ विघ्नेश्वरास्त्वज १५
चत्वारो वा चतुर्दिक्षु स्थापनीया गरुत्मतः
ध्वजारोहं च वक्ष्यामि येन भूतादि नश्यति १६
प्रासादविम्बद्रव्याणां यावन्तः परमाणवः
तावद्वर्षसहस्त्राणि तत्कर्ता विष्णुलोकभाक् १७

कुम्भाराडवेदिविम्बानां भ्रमणाद्वायुनानघ
कराठस्यावेष्टनाज् ज्ञेयं फलं कोटिगुणं ध्वजात् १८
पताकां प्रकृतिं विद्धि दराडं पुरुषरूपिणम्
प्रासादं वासुदेवस्य मूर्तिभेदं निबोध मे १९
धारणाद्धरणीं विद्धि आकाशं शुषिरात्मकम्
तेजस्तत् पावकं विद्धि वायुं स्पर्शगतं तथा २०
पाषाणादिष्वेव जलं पार्थिवं पृथिवीगुणम्
प्रतिशब्दोद्भवं शब्दं स्पर्शं स्यात् कर्कशादिकम् २१
शुक्लादिकं भवेद्रूपं रसमन्नादिदर्शनम्
धूपादिगन्धं गन्धन्तु वाग् भेर्यादिषु संस्थिता २२
शुकनासाश्रिता नासा बाहू तद्रथकौ स्मृतौ
शिरस्त्वराडं निगदितं कलशं मूर्धजं स्मृतम् २३
कराठं कराठमिति ज्ञेयं स्कन्धं वेदी निगद्यते
पायूपस्थे प्रणाले तु त्वक् सुधा परिकीर्तिता २४
मुखं द्वारं भवेदस्य प्रतिमा जीव उच्यते
तच्छक्तिं पिरिडकां विद्धि प्रकृतिं च तदाकृतिम् २५
निश्चलत्वञ्च गर्भोऽस्या अधिष्ठाता तु केशवः
एवमेष हरिः साक्षात्प्रासादत्वेन संस्थितः २६

जङ्घा त्वस्य शिवो ज्ञेयः स्कन्धे धाता व्यवस्थितः
ऊर्ध्वभागे स्थितो विष्णुरेवं तस्य स्थितस्य हि २७
प्रासादस्य प्रतिष्ठान्तु ध्वजरूपेण मे शृणु
ध्वजं कृत्वा सुरैर्दैत्या जिताः शस्त्रादिचिह्नितम् २८
अण्डोर्ध्वं कलशं न्यस्य तदूर्ध्वं विन्यसेद् ध्वजम्
विम्बार्धमानं दण्डस्य त्रिभागेनाथ कारयेत् २९
अष्टारं द्वादशारं वा मध्ये मूर्तिमतान्वितम्
नारसिंहेन तार्क्ष्येण ध्वजदण्डस्तु निर्व्रणः ३०
प्रासादस्य तु विस्तारो मानं दण्डस्य कीर्तितम्
शिखरार्धेन वा कुर्यात् तृतीयार्धेन वा पुनः ३१
द्वारस्य दैर्घ्याद् द्विगुणं दण्डं वा परिकल्पयेत्
ध्वजयष्टिर्देवगृहे ऐशान्यां वायवेऽथवा ३२
क्षौमाद्यैश्च ध्वजं कुर्याद्विचित्रं वैकवर्णकं
घण्टाचामरकिङ्किण्या भूषितं पापनाशनम् ३३
दण्डाग्राद्धरणीं यावद्धस्तैकं विस्तरेण तु
महाध्वजः सर्वदः स्याच्चतुर्यांशाद्धीनतोऽर्चितः ३४
ध्वजे चार्धेन विज्ञेया पताका मानवर्जिता
विस्तारेण ध्वजः कार्यो विंशदङ्गुलसन्निभः ३५

अधिवासविधानेन चक्रं दराडं ध्वजं तथा
देववत् सकलं कृत्वा मराडपस्नपनादिकम् ३६
नेत्रोन्मीलनकं त्यक्त्वा पूर्वोक्तं सर्वमाचरेत्
अधिवासयेच्च विधिना शय्यायां स्थाप्य देशिकः ३७
ततः सहस्रशीर्षेति सूक्तं चक्रे न्यसेद् बुधः
तथा सुदर्शनं मन्त्रं मनस्तत्त्वं निवेशयेत् ३८
मनोरूपेण तस्यैव सजीवकरणं स्मृतम्
अरेषु मूर्तयो न्यस्याः केशवाद्याः सुरोत्तम ३९
नाभ्यब्जप्रतिनेमीषु न्यसेत्तत्त्वानि देशिकः
नृसिंहं विश्वरूपं वा अब्जमध्ये निवेशयेत् ४०
सकलं विन्यसेद्दराडे सूत्रात्मानं सजीवकम्
निष्कलं परमात्मानं ध्वजे ध्यायन् न्यसेद्धरिम् ४१
तच्छक्तिं व्यापिनीं ध्यायेद् ध्वजरूपां बलाबलाम्
मराडपे स्थाप्य चाभ्यर्च्य होमं कुराडेषु कारयेत् ४२
कलशे स्वर्णकलशं न्यस्य रत्नानि पञ्च च
स्थापयेच्चक्रमन्त्रेण स्वर्णचक्रमधस्ततः ४३
पारदेन तु सम्प्लाव्य नेत्रपट्टेन च्छादयेत्
ततो निवेशयेच्चक्रं तन्मध्ये नृहरिं स्मरेत् ४४

ॐ क्षौं नृसिंहाय नमः पूजयेत् स्थापयेद्धरिम्
ततो ध्वजं गृहीत्वा तु यजमानः सबान्धवः ४५
दधिभक्तयुते पात्रे ध्वजस्याग्रं निवेशयेत्
ध्रुवाद्येन फडन्तेन ध्वजं मन्त्रेण पूजयेत् ४६
शिरस्याधाय तत् पात्रं नारायणमनुस्मरन्
प्रदक्षिणं तु कुर्वीत तुर्यमङ्गलनिःस्वनैः ४७
ततो निवेशयेत् दण्डं मन्त्रेणाष्टाक्षरेण तु
मुञ्चामि त्वेति सूक्तेन ध्वजं मुञ्चेद्द्विचक्षणः ४८
पात्रं ध्वजं कुञ्जरादि दद्यादाचार्यके द्विजः
एष साधारणः प्रोक्तो ध्वजस्यारोहणे विधिः ४९
यस्य देवस्य यच्चिह्नं तन्मन्त्रेण स्थिरं चरेत्
स्वर्गत्वा ध्वजदानात्तु भुवि राजा बली भवेत् ५०
इत्यादिमहापुराणे आग्नेये ध्वजारोहणं नाम एकषष्टितमोऽध्यायः

अथ द्विषष्टितमोऽध्यायः

लक्ष्मीप्रतिष्ठाविधिः

भगवानुवाच
समुदायेन देवादेः प्रतिष्ठां प्रवदामि ते
लक्ष्म्याः प्रतिष्ठा प्रथमं तथा देवीगणस्य च १